माह कृत्यकल्पलतायां विष्णुः सप्तबदरपत्राणि
सप्तार्कपत्राणि च शिरसि निधाय,—
"ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"
इत्युच्चार्य्य स्नायादिति शेषः । रोगं छिद्रम् ।
तिथिकृत्यस्य पौर्णमास्यन्तमासाङ्गत्वात् माक-
रीपदं मकरार्कारब्धचान्द्रमासीयतिथिपरम् ।
तिथितत्त्वे च लक्षादिं व्रते सुक्तादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दिशे-
दिति ब्रह्मपुराणात् मन्वन्तरादित्वेन तथा
युक्तत्वाच्च । यथा, मत्स्यपुराणम् ।
"यस्मान्मन्वन्तरादौ तु रथमापुर्द्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ॥
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।"
अतएव नारसिंहे रथाख्यायामित्युक्तम् ॥ * ॥
अर्घ्यदानपरिपाटी यथा,—
"अर्कपत्रैः सबदरैर्दूर्व्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिनार्घ्यं दद्यादादित्यतुष्टये ।
अष्टाङ्गमर्घ्यमापूर्य्य भानोर्म्मूर्द्ध्नि निवेदयेत् ॥
अर्घ्यमन्त्रस्तु ।
जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥
प्रणाममन्त्रस्तु ।
सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्याञ्च नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यां सूर्य्यमुद्दिश्य रथयात्राफलं यथा,—
"माघमासस्य सप्तम्यां देवं शाम्बपुरं नराः ।
रथयात्रां प्रकुर्व्वन्ति सर्व्वद्वन्द्वविवर्जिताः ॥
गच्छन्ति तत्पदं शान्तं सूर्य्यमण्डलभेदकम् ।
एतत्ते कथितं देवि ! शाम्बशापसमुद्भवम् ।
पापप्रशमनाख्यानं महापातकनाशनम् ॥"
इति वराहपुराणम् ॥
माक्ष, ऋ कांक्षि । इति कविकल्पद्रुमः ॥ ( भ्वा०-
पर०-सक०-सेट् । ) ऋ माक्षति नमध्यपाठे-
नैवेष्टसिद्धे इदनुबन्धो वैदेशूच्चारणभेदार्थः ।
इति दुर्गादासः ॥
माक्षिकं, क्ली, ( मक्षिकाभिः कृतम् । मक्षिका+
"संज्ञायाम् ।" ४ । ३ । ११७ । इति ठक् । )
मधु । इत्यमरः । २ । ९ । १०७ ॥ नीलवर्ण-
मध्यममक्षिकाकृततैलवर्णमधु । अस्य गुणाः ।
क्षौद्राल्लघुतरत्वम् । रूक्षत्वम् । श्रेष्ठत्वम् ।
श्वासादिरोगे विशेषतः प्रशस्ततरत्वञ्च । इति
राजवल्लभः ॥ धातुविशेषः । धातुमाखी इति
हिन्दीभाषा । तद्द्विविधम् । स्वर्णमाक्षिकं
रौप्यमाक्षिकञ्च । तत्पर्य्यायः । माक्षीकम् २
पीतकम् ३ धातुमाक्षिकम् ४ तापिच्छम् ५
ताप्यकम् ६ ताप्यम् ७ आपीतम् ८ पीत-
माक्षिकम् ९ आवर्त्तम् १० मधुधातुः ११ क्षौद्र-
धातुः १२ मान्त्रिकधातुः १३ । इति राज-
निर्घण्टः ॥ कदम्बः १४ चक्रनाम १५ अज-
नामकम् १६ । इति हेमचन्द्रः । ४ । १२० ॥
अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । अम्ल-
त्वम् । कफभ्रमहृल्लासमूर्च्छार्त्तिश्वासकासविषा-
पहत्वञ्च ।
"माक्षिकं द्विविधं प्रोक्तं हेमाभं तारमाक्षिकम् ।
भिन्नवर्णविशेषत्वाद्रसवीर्य्यादिकं पृथक् ॥
तारपाण्डादिके तारमाक्षिकञ्च प्रशस्यते ।
देहे हेमाभकं शस्तं रोगहृद्बलपुष्टिदम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"केतकी माक्षिको धातुः सुवर्णरजतद्युतिः ।
जराजित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः ॥
मधुरोऽम्लः कटुः पाके किञ्चिदुष्णोऽक्लतोपमः ॥"
इति कश्चिद्राजवल्लभः ॥
( उपधातुविशेषः । यथा, सुखबोधे ।
"माक्षिकं तुत्थिताभ्रे च नीलाञ्जनशिलालकाः ।
रसकश्चेति विज्ञेया एते सप्तोपधातवः ॥")
माक्षिकजं, क्ली, ( माक्षिकात् जातम् । जन+
डः । ) शिक्थकम् । इति राजनिर्घण्टः ॥
माक्षिकफलः, पुं, ( माक्षिकवत् मधुरं फलमस्य । )
मधुनारिकेरिकः । इति राजनिर्घण्टः ॥
माक्षिकाश्रयं, क्ली, ( माक्षिकाणामाश्रयः ।
अभिधानात् क्लीवत्वम् । ) शिक्थकम् । इति
राजनिर्घण्टः ॥
माक्षीकं, क्ली, ( मक्षिकाभिः कृतमित्यण् । निपा-
तनाद्दीर्घत्वम् । ) मधु । इति राजनिर्घण्टः ॥
( धातुविशेषः । यथा, कथासरित्सागरे ।
७६ । ३ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥")
माक्षीकशर्करा, स्त्री, ( माक्षीककृता शर्करा
शाकपार्थिवादिवत् समासः । ) सिताखण्डः ।
इति राजनिर्घण्टः ॥
मागधः, पुं, ( मगधस्य तद्वंशस्यापत्यम् । "द्व्यञ्-
मगधकलिङ्गसूरमसादण् ।" ४ । १ । १७० ।
इति । अण् । ) याचिस्वनकः । इति महा-
भारतम् ॥ वंशक्रमेण महत्त्ववेदिराजाग्रस्तुति-
कारी । तत्पर्य्यायः । मधुकः २ वन्दी ३ स्तुति-
पाठकः ४ । इत्यमरभरतौ । २ । ८ । ९७ ।
तस्योत्पत्तिर्यथा,—
ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते तदा द्विजाः ।
मथ्यमाने च तत्राभूत् पृथुर्वैण्यः प्रतापवान् ॥
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामते ! ॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ ॥
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान् ।"
सुत्यामिति सुतिरभिषुतिः अभिषूयते कण्ड्यते
सोमोऽस्यामिति सुतिः सोमाभिषवभूमिस्त-
स्याम् । सौत्येऽहनि तस्मिन्नेव दिने । इति
विष्णुपुराणे १ अंशे ४१ अध्यायस्तट्टीका च ॥
( यथा, महाभारते । १३ । ४८ । १२ ।
"वन्दी तु जायते वैश्यान्मागधो वाक्य-
जीवनः ।" )
वर्णसङ्करजातिविशेषः । ( यथा, मानवे ।
१० । ११ ।
"क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥")
स तु क्षत्रियायां वैश्याज्जातः । भाट् इति
ख्यातः । मगधेषु भवो मागधः स्मः इत्यमर-
भरतौ । २ । १० । २ । जरासन्धराजः ।
तथा,—
"मागधो न च हन्तव्यो भूयः कर्त्ता बलोद्यमम् ।"
इति श्रीभागवते १० स्कन्धः ॥
शुक्लजीरकः । मगधदेशोद्भवे त्रि । इति
मेदिनी । धे, ३४ ॥ ( यथा, महाभारते ।
६ । ९ । ४९ ।
"अन्धाश्च बहवो राजन्नन्तर्गिर्य्याश्चैव च ।
बहिर्गिर्य्याङ्गमलदा मागधा मालवाञ्जटाः ॥")
मागधादेवी, स्त्री, राधिका । यथा,—
"तासान्तु मागधादेवी तप्तचामीकरप्रभा ।
वृन्दावनेश्वरी राधा नाम्ना ध्यात्वर्थकारणात् ॥"
इति पाद्मे पातालखण्डे ९ अध्यायश्लोकाद्वयम् ॥
मागधी, स्त्री, ( मागधे जाता । मगध+अण्,
ङीष् । ) यूथिका । पिप्पली । इत्यमरमेदिनी-
करौ । धे, । ३४ । २ । ४ । ९६ । ( अस्याः
पर्य्यायः ।
"पिप्पली च पलाशौण्डी वैदेही मागधी-
कणा ।
कृष्णोपकुल्या मगधी कोलास्यातिक्ततण्डुला ॥"
इति वैद्यकरत्नमालायाम् ॥ )
त्रुटिः । गुजराटी एलाचि इति भाषा । इति
शब्दचन्द्रिका ॥ शर्करा । इति जटाधरः ॥
भाषाविशेषः । इति हेमचन्द्रः ॥ यथा च
साहित्यदर्पणे । ६ । १६० ।
"अत्रोक्ता मागधी भाषा राजान्तःपुरचारि-
णाम् ॥"
(तद्देशभवे, त्रि । यथा, महाभारते । १ । ९५ । ४१ ।
"अनन्ता खलु मागधीमुपयेमे अन्ततो नाम
तस्यामस्य जज्ञे परीक्षित् ॥)
माघः, पुं, श्रीदत्तकसूनुशिशुपालवधमहाकाव्य-
कर्त्ता । इति तद्ग्रन्थशेषपुष्पिका ॥ स्वनाम-
ख्यातमहाकाव्यम् । यथा,—

पुष्पेषु जाती नगरेषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः ।
नदीषु गङ्गा नृपतौ च रामः
काव्येषु माघः कविकालिदासः ॥"

इति प्राचीनाः ॥
वैशाखादिद्वादशमासान्तर्गतदशममासः ।
मघायुक्ता पौर्णमासी यत्र मासे सः ॥ तत्-
पर्य्यायः । तपाः २ । इत्यमरः । ४ । १ । ४ । १५ ॥
स च त्रिविधः । मकरस्थरव्यारब्धशुक्लप्रति-
पदादिदर्शान्तो मुख्यचान्द्रः १ । कृष्णप्रति-